**रिष** वधे भ्वा०पर०सक०सेट् । रेषति अरेषीत् । रिरेष ।

**रिष्ट** न० रिश-क्त । १मङ्गले २अशुभे ३पापे च अमरः । भावे क्त । ४नाशे, ५अशुभादिमति त्रि० । उपचारात् । ६खड्गे, ७रक्तशिग्रौ च पु० मेदि० । स्वार्थे क । तेषु ।

**रिष्टि** स्त्री० रिष-रिश-वा क्तिन् । १अशुभे, २शस्त्रभेदे खड्गे पु०मेदि० । क्तिच् । ३रन्ध्रे पु० । सा च हं०जा०दृश्याः

**रिह** वधे भ्वा० पर० सक० सेट् । रेहति अरेहीत् ।

**री** चरणे दि० आ० अक० अनिट् । रीयते अरेष्ट ओदित् निष्ठातस्य नः । रीणः । [ रायति अरैषीत् ।

**री** गतौ वधे च सक० रवे अक० क्र्या० प्रा० अनिट् । रि-

**रीठा** स्त्री री-ठक् ठस्य नेत्त्वम् । रीठाकरञ्जे "रीठाकरञ्जस्तिक्तोष्णः कटुगन्धश्च वातहृत् । कण्डूतिकुष्ठविषहृत् कफविस्फोटनाशनः" राजनि० ।

**रीठाकरञ्ज** पु० कर्म० । स्वनामख्याते वृक्षे राजनि० ।

**रीढा** स्त्री रिह-क्त नि० ढ़ढभावः । अवज्ञायाम् अमरः ।

**रीण** त्रि० री-क्त । क्षरिते स्रुते अमरः ।

**रीति** स्त्री री क्तिच् ।१पित्तले । क्तिन् ।२प्रस्रावे,३क्षरणे अमरः ४लौहकिट्टे, मेदि० । ५दग्धस्वर्णादिमले रमा० । ६शोभायां, ७गतौ, ८स्वभावे, हेमच० । अलङ्कारोक्ते ९गौडयादिरचनाभेदे च "गौडीपाञ्चालवैदर्भ्यो रीतयः परिकीर्त्तिताः" सा० द० । [तत्रार्थे स्त्री शब्दर०

**रीतिक** न०रीत्या पित्तलेन कायति कै-क । पुष्पाञ्जने राजनि०

**रीतिपुष्प** न० रीतेः पुष्पमिव । कुसुमाञ्जने अमरः ।

**रीव** ग्रहणे, संवरणे च भ्वा०उभ० सक० सेट् । रीवति ते अरीवीत् अरीविष्ट । ऋदित् चङि न ह्रस्वः ।

**रु** ध्वनौ अदा०पर०अक०वेट् । रौति-रवीति अरावीत्-अरौषीत् । लिटि नित्येट् रुरविथ । [रुरुविषे ।

**रु** वधे गतौ च भ्वा० आ० सक० अनिट् । रवते अरोष्ट ।

**रुक्प्रतिक्रिया** स्त्री रुजः प्रतिक्रिया प्रतिकारः प्रति+ कृ-भावे श इत० । चिकित्सायाम् अमरः ।

**रुक्म** न० रुच-मन् नि० कुत्वम् । १काञ्चने, २धस्तूरे, अमरः ३लौहे, मेदि० ४नागकेसरे च राजनि० ।

**रुक्मकारक** पु० रुक्मं तन्निमित्तभूषणं करोति कृ० ण्वुल् । स्वर्णकारे अमरः ।

**रुक्मिन्** त्रि० रुक्मं विद्यतेऽस्य इनि । १स्वर्णयुक्ते २भीष्मकराजज्येष्ठपुत्रे पु०राजभेदे भाग०१०।५२ । ३रुक्मिराजकन्यायां श्रीकृष्णपत्न्यां स्त्री ङीप् ।

**रुक्ष** त्रि०रुह-क्स ।१अचिक्कणे २निःस्नेहे ३कठोरे च अमरः

**रुग्ण** त्रि०रुज-क्त । १रोगान्विते राजनि० २भुग्ने च अमरः

**रुच** प्रीतौ प्रकाशे च भ्वा० आ० अक० सेट् । रोचते लुङि उ० अरुचत् अरोचिष्ट । एतद्योगे प्रीयमाणस्य सम्प्रदानता "नारदाय रोचते कलहः" सि०कौ० ।

**रुचक** न० रुच-कुन् । १सर्जिकाक्षारे, माङ्गल्ये २द्रव्ये, ३अश्वभूषणे, ४माल्ये ५सौवर्चले, ६उत्कटे त्रि० मेदि० ७आस्वाद्यरसे, शब्दच० ८रोचनायाम्, ९विड़ङ्गे न० हेमच० १०लवणे न० हारा० । ११वीजपूरे, १२दन्ते, १३निष्के पु० १४कपोते च पुंस्त्री०मेदि० स्त्रियां ङीष् । १५स्वर्णपात्रभेदे च ।

**रुच्(चा)** स्त्री रुच सम्प० क्विप् वा टाप् । १दीप्तौ, २शोभायां, ३प्रकाशे, ४शारिकाखगवाचि च शब्दर० ।

**रुचि(ची)** स्त्री रुच-कि वा ङीप् । १अनुरागे २आसङ्गे ३स्पृहायाम् ४अभिलाषे ५किरणे अमर । ६शोभायां मेदि० ७बुभुक्षायां हेमच० । ८गोरोचनायां च राजनि० । ९प्रजापतिभेदे पु०मार्क०पु० । १०आलिङ्गनभेदे कामशास्त्रम् ।

**रुचिर** त्रि० रुचिं राति ददाति रा—क । १मनोहरे सुन्दरे १मधुरे च अमरः । २मूलके ३कुङ्कुमे ४लवङ्गे च न० ५गोरोचनायां स्त्री राजनि० ।

**रुचिराञ्जन** पु० अज्यतेऽनेन अन्ज—करणे ल्युट् रुचिरः शोभायुक्तोऽञ्जनः । शोभाञ्जने (सजिना) राजनि० ।

**रुच्य** त्रि०रुचये हितः यत् । १सुन्दरे २रुचिकरे च अमरः । २सौवर्चले न० राजनि० । ३पत्यौ पु०हेमच० । ४कतकवृक्षे ५शालिधान्ये च पु० राजनि० ।

**रुच्यकन्द** पु० रुच्यः रुचिकरः कन्दो मूलमस्य । शूरणे (ओल) राजनि० । [निष्ठातस्य नः । रुग्णः ।

**रुज** भञ्जने तु०प०सक०अनिट् । रुजति अरौक्षीत् ओदित्

**रुज** हिंसायां चु० उभ०सक०सेट् । रोजयति ते अरूरुजत् त रोगकर्तृकस्यास्य योगे कर्मणि षष्ठी । रुजयति चौरस्य रोगः

**रुज्(जा)** स्त्री रुज—सम्प० क्विप् वा टाप् रुज—अङ् वा । १रोगे २भङ्गे मेदि० रुज—क । ३मेष्यां हेमच० । ४कुष्ठे च (कुड़) राजनि० । एतद्योगे कर्मषष्ठ्या न समासः ।

**रुजाकर** न० रुजां रोगं करोति कृ—अच् । १कर्मरङ्गफले (कामराङ्गा) शब्दच० २रोगकारके त्रि० । ३व्याधौ पु० हेमच० ।

**रुट** चौर्य्ये भ्वा० पर०सक०सेट् इदित् । रुण्टति अरुण्टीत् ।

**रुट** रोधे सक० दीप्तौ अक० चु० उभ० सेट् । रोटयति ते अरूरुटत् त ।